*Mahābhārata*, I, 109, vv.5-22

राजा पाण्डुर्महारण्ये मृगव्यालनिषेविते।/ [वैशम्पायन]
वने मैथुनकालस्थं ददर्श मृगयूथपम्॥१॥
ततस्तां च मृगीं तं च रुक्मपुङ्खैः सुपत्रिभिः।
निर्बिभेद शरैस्तीक्ष्णैः पाण्डुः पञ्चभिराशुगैः॥२॥
स च राजन्महातेजा ऋषिपुत्रस्तपोधनः।
भार्यया सह तेजस्वी मृगरूपेण संगतः॥३॥
संसक्तस्तु तया मृग्या मानुषीमीरयन्गिरम्।
क्षणेन पतितो भूमौ विललापाकुलेन्द्रियः॥४॥
काममन्युपरीता अपि बुद्ध्यङ्गरहिता अपि च।/ [मृग]
वर्जयन्ति नृशंसानि पापेष्वभिरता नराः॥५॥
न विधिं ग्रसते प्रज्ञा प्रज्ञां तु ग्रसते विधिः।
विधिपर्यागतानर्थान्प्रज्ञा न प्रतिपद्यते॥६॥
शश्वद्धर्म आत्मनां मुख्ये कुले जातस्य भारत।
कामलोभाभिभूतस्य कथं ते चलिता मतिः॥७॥
शत्रूणां या वधे वृत्तिः सा मृगाणां वधे स्मृता।/ [पाण्डु]
राज्ञां मृग न मां मोहात्त्वं गर्हयितुमर्हसि॥८॥
अच्छद्मनामायया च मृगाणां वध इष्यते।
स एव धर्मो राज्ञां तु तद्विद्वान् किं नु गर्हसे॥९॥
अगस्त्यः सत्रमासीनश्चचार मृगयामृषिः।
आरण्यान्सर्वदैवत्यान्मृगान्प्रोक्ष्य महावने॥१०॥
प्रमाणदृष्टधर्मेण कथमस्मान्विगर्हसे।
अगस्त्यस्याभिचारेण युष्माकं वै वपा हुता॥११॥
न रिपून्वै समुद्दिश्य विमुञ्चन्ति पुरा शरान्।/ [म्]
रन्ध्र एषां विशेषेण वधकालः प्रशस्यते॥१२॥
प्रमत्तमप्रमत्तं वा विवृतं घ्नन्ति चौजसा।/ [प्]
उपायैरिषुभिस्तीक्ष्णैः कस्मान्मृगविगर्हसे॥१३॥
नाहं घ्नन्तं मृगान्राजन्विगर्हे आत्मकारणात्।/ [म्]
मैथुनं तु प्रतीक्ष्यं मे स्यात्त्वयेहानृशंसतः॥१४॥
सर्वभूतहिते काले सर्वभूतेप्सिते तथा।
को हि विद्वान्मृगं हन्याच्चरन्तं मैथुनं वने।
पुरुषार्थफलं कान्तं यत्त्वया वितथं कृतम्॥१५॥
पौरवाणामृषीणां च तेषामक्लिष्टकर्मणाम्।
वंशे जातस्य कौरव्य नानुरूपमिदं तव॥१६॥
नृशंसं कर्म सुमहत्सर्वलोकविगर्हितम्।
अस्वर्ग्यमयशस्यं चाधर्मिष्ठं च भारत॥१७॥
स्त्रीभोगानां विशेषज्ञः शास्त्रधर्मार्थतत्त्ववित्।
नार्हस्त्वं सुरसंकाशकर्तुमस्वर्ग्यमीदृशम्॥१८॥
त्वया नृशंसकर्तारः पापाचाराश्च मानवाः।
निग्राह्याः पार्थिवश्रेष्ठ त्रिवर्गपरिवर्जिताः॥१९॥
किं कृतं ते नरश्रेष्ठ निघ्नतो मामनागसम्।
मुनिं मूलफलाहारं मृगवेषधरं नृप।
वसमानमरण्येषु नित्यं शमपरायणम्॥२०॥
त्वयाहं हिंसितो यस्मात्तस्मात्त्वामप्यसंशयम्।
द्वयोर्नृशंसकर्तारमवशं काममोहितम्।

जीवितान्तकरो भाव एवमेवागमिष्यति ॥२१॥
अहं हि किंदमो नाम तपसाप्रतिमो मुनिः।
व्यपत्रपन्मनुष्याणां मृग्यां मैथुनमाचरम् ॥२२॥
मृगो भूत्वा मृगैः सार्धं चरामि गहने वने।
न तु ते ब्रह्महत्येयं भविष्यत्यविजानतः।
मृगरूपधरं हत्वा मामेवं काममोहितम् ॥२३॥
अस्य तु त्वं फलं मूढ प्राप्स्यसीदृशमेव हि।
प्रियया सह संवासं प्राप्य कामविमोहितः।
त्वमप्यस्यामवस्थायां प्रेतलोकम् गमिष्यसि ॥२४॥
अन्तकाले च संवासं यया गन्तासि कन्यया।
प्रेतराजवशं प्राप्तं सर्वभूतदुरत्ययम्।
भक्त्या मतिमतां श्रेष्ठ सा एव त्वामनुयास्यति ॥२५॥
वर्तमानः सुखे दुःखं यथाहं प्रापितस्त्वया।
तथा सुखं त्वां सम्प्राप्तं दुःखमभ्यागमिष्यति ॥२६॥
एवमुक्त्वा सुदुःखार्तो जीवितात्स व्ययुज्यत।/ [वैशम्]
मृगः पाण्डुश्च शोकार्तः क्षणेन समपद्यत ॥२७॥

*Mahābhārata*, I, 109, vv.5-22

*rājā pāṇḍurmahāraṇye mṛgavyālaniṣevite*| [*vaiśampāyana*]
*vane maithunakālasthaṃ dadarśa mṛgayūthapam*||*1*||
*tatastāṃ ca mṛgīṃ taṃ ca rukmapuṅkhaiḥ supatribhiḥ*|
*nirbibheda śaraistīkṣṇaiḥ pāṇḍuḥ pañcabhirāśugaiḥ*||*2*||
*sa ca rājanmahātejā ṛṣiputrastapodhanaḥ*|
*bhāryayā saha tejasvī mṛgarūpeṇa saṃgataḥ*||*3*||
*saṃsaktastu tayā mṛgyā mānuṣīmīrayangiram*|
*kṣaṇena patito bhūmau vilalāpākulendriyaḥ*||*4*||
*kāmamanyuparītā api buddhyaṅgarahitā api ca*| / [*mṛga*]
*varjayanti nṛśaṃsāni pāpeṣvabhiratā narāḥ*||*5*||
*na vidhiṃ grasate prajñā prajñāṃ tu grasate vidhiḥ*|
*vidhiparyāgatānarthānprajñā na pratipadyate*||*6*||
*śaśvaddharma ātmanāṃ mukhye kule jātasya bhārata*|
*kāmalobhābhibhūtasya kathaṃ te calitā matiḥ*||*7*||
*śatrūṇāṃ yā vadhe vṛttiḥ sā mṛgāṇāṃ vadhe smṛtā*| / [*pāṇḍu*]
*rājñāṃ mṛga na māṃ mohāttvaṃ garhayitumarhasi*||*8*||
*acchadmanāmāyayā ca mṛgāṇāṃ vadha iṣyate*|
*sa eva dharmo rājñāṃ tu tadvidvān kiṃ nu garhase*||*9*||
*agastyaḥ satramāsīnaścacāra mṛgayāmṛṣiḥ*|
*āraṇyānsarvadaivatyānmṛgānprokṣya mahāvane*||*10*||
*pramāṇadṛṣṭadharmeṇa kathamasmānvigarhase*|
*agastyasyābhicāreṇa yuṣmākaṃ vai vapā hutā*||*11*||
*na ripūnvai samuddiśya vimuñcanti purā śarān*| / [*m*]
*randhra eṣāṃ viśeṣeṇa vadhakālaḥ praśasyate*||*12*||
*pramattamapramattaṃ vā vivṛtaṃ ghnanti caujasā*| / [*p*]
*upāyairiṣubhistīkṣṇaiḥ kasmānmṛgavigarhase*||*13*||
*nāhaṃ ghnantaṃ mṛgānrājanvigarha ātmakāraṇāt*| / [*m*]
*maithunaṃ tu pratīkṣyaṃ me syāttvayehānṛśaṃsataḥ*||*14*||
*sarvabhūtahite kāle sarvabhūtepsite tathā*|
*ko hi vidvānmṛgaṃ hanyāccarantaṃ maithunaṃ vane*|
*puruṣārthaphalaṃ kāntaṃ yattvayā vitathaṃ kṛtam*||*15*||
*pauravāṇāmṛṣīṇāṃ ca teṣāmakliṣṭakarmaṇām*|
*vaṃśe jātasya kauravya nānurūpamidaṃ tava*||*16*||
*nṛśaṃsaṃ karma sumahatsarvalokavigarhitam*|
*asvargyamayaśasyaṃ cādharmiṣṭhaṃ ca bhārata*||*17*||
*strībhogānāṃ viśeṣajñaḥ śāstradharmārthatattvavit*|
*nārhastvaṃ surasaṃkāśakartumasvargyamīdṛśam*||*18*||
*tvayā nṛśaṃsakartāraḥ pāpācārāśca mānavāḥ*|
*nigrāhyāḥ pārthivaśreṣṭha trivargaparivarjitāḥ*||*19*||
*kiṃ kṛtaṃ te naraśreṣṭha nighnato māmanāgasam*|
*muniṃ mūlaphalāhāraṃ mṛgaveṣadharaṃ nṛpa*|
*vasamānamaraṇyeṣu nityaṃ śamaparāyaṇam*||*20*||
*tvayāhaṃ hiṃsito yasmāttasmāttvāmapyasaṃśayam*|
*dvayornṛśaṃsakartāramavaśaṃ kāmamohitam*|
*jīvitāntakaro bhāva evamevāgamiṣyati*||*21*||
*ahaṃ hi kiṃdamo nāma tapasāpratimo muniḥ*|
*vyapatrapanmanuṣyāṇāṃ mṛgyāṃ maithunamācaram*||*22*||

*mṛgo bhūtvā mṛgaiḥ sārdhaṃ carāmi gahane vane|*
*na tu te brahmahatyeyaṃ bhaviṣyatyavijānataḥ|*
*mṛgarūpadharaṃ hatvā māmevaṃ kāmamohitam||23||*
*asya tu tvaṃ phalaṃ mūḍha prāpsyasīdṛśameva hi|*
*priyayā saha saṃvāsaṃ prāpya kāmavimohitaḥ|*
*tvamapyasyāmavasthāyāṃ pretalokam gamiṣyasi||24||*
*antakāle ca saṃvāsaṃ yayā gantāsi kanyayā|*
*pretarājavaśaṃ prāptaṃ sarvabhūtaduratyayam|*
*bhaktyā matimatāṃ śreṣṭha sā eva tvāmanuyāsyati||25||*
*vartamānaḥ sukhe duḥkhaṃ yathāhaṃ prāptitastvayā|*
*tathā sukhaṃ tvāṃ samprāptaṃ duḥkhamabhyāgamiṣyati||26||*
*evamuktvā suduḥkhārto jīvitātsa vyayujyata|* / [*vaiśam*]
*mṛgaḥ pāṇḍuśca śokārtaḥ kṣaṇena samapadyata||27||*